गीतम् – १

पठत संस्कृतम्	**paṭhata saṁskṛtam**
पठत संस्कृतं, वदत संस्कृतम् । लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ॥ ॥ पठत ॥	paṭhata saṁskṛtaṁ, vadata saṁskṛtam | lasatu saṁskṛtaṁ ciraṁ gṛhē gṛhē ca punarapi || || paṭhata ||
ज्ञानवैभवं वेदवाङ्मयं लसति यत्र भवभयापहारि-मुनिभिरार्जितम् । कीर्तिरार्जिता यस्य प्रणयनात् व्यास-भास-कालिदास-बाण-मुख्यकविभिः ॥ ॥ पठत ॥	jñānavaibhavaṁ vēdavāṅmayaṁ lasati yatra bhavabhayāpahāri munibhirārjitam | kīrtirārjitā yasya praṇayanāt vyāsa-bhāsa-kālidāsa-bāṇa-mukhyakavibhiḥ || || paṭhata ||
स्थानमूर्जितं यस्य मन्वते वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम् । यद्विना जना नैव जानते भारतीयसंस्कृतिं सनातनाभिधां वराम् ॥ ॥ पठत ॥	sthānamūrjitaṁ yasya manvatē vāgvicintakā hi vākṣu yasya vīkṣya madhuratām | yadvinā janā naiva jānatē bhāratīyasaṁskṛtiṁ sanātanābhidāṁ varām || || paṭhata ||
जयतु संस्कृतं, संस्कृतिस्तथा संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम् । जयतु संस्कृतं, जयतु मनुकुलम् जयतु जयतु संस्कृतं, जयतु जयतु मनुकुलम् ॥ पठत ॥	jayatu saṁskṛtaṁ, saṁskṛtistathā saṁskṛtasya saṁskṛtēśca praṇayanācca manukulam | jayatu saṁskṛtaṁ, jayatu manukulam jayatu jayatu saṁskṛtaṁ, jayatu jayatu manukulam || paṭhata ||
- श्री मञ्जुनाथशर्मा	- śrī mañjunāthaśarmā

गीतम् – २

नैव क्लिष्टा न च कठिना	**naiva kliṣṭā na ca kaṭhinā**
सुरससुबोधा विश्वमनोज्ञा ललिता हृद्या रमणीया । अमृतवाणी संस्कृतभाषा नैव क्लिष्टा न च कठिना ॥	surasa-subōdhā viśva-manōjñā lalitā hṛdyā ramaṇīyā | amṛtavāṇī saṁskṛtabhāṣā naiva kliṣṭā na ca kaṭhinā ||
कविकोकिल-वाल्मीकि-विरचिता रामायण-रमणीय-कथा । अतीवसरला मधुरमञ्जुला नैव क्लिष्टा न च कठिना ॥	kavikōkila-vālmīki-viracitā rāmāyaṇa-ramaṇiya-kathā | atīva-saralā madhura-mañjulā naiva kliṣṭā na ca kaṭhinā ||
व्यासविरचिता गणेशलिखिता महाभारते पुण्यकथा । कौरव-पाण्डव-सङ्गरमथिता नैव क्लिष्टा न च कठिना ॥	vyāsa-viracitā gaṇēśalikhitā mahabhāratē puṇya-kathā | kaurava-pāṇḍava-saṅgaramathitā naiva kliṣṭā na ca kaṭhinā ||
कुरुक्षेत्र-समराङ्गण-गीता विश्ववन्दिता भगवद्गीता । अमृतमधुरा कर्मदीपिका नैव क्लिष्टा न च कठिना ॥	kurukṣētra-samarāṅgaṇa-gītā viśvavanditā bhagavadgītā | amṛtamadhurā karmadīpikā naiva kliṣṭā na ca kaṭhinā ||
कविकुलगुरु-नवरसोन्मेषजा ऋतु-रघु-कुमार-कविता । विक्रम-शाकुन्तल-मालविका नैव क्लिष्टा न च कठिना ॥	kavikulaguru-navarasōnmēṣajā ṛtu-raghu-kumāra-kavitā | vikrama-śākuntala-mālavikā naiva kliṣṭā na ca kaṭhinā ||
- श्री वसन्त गाड्गीलः	- śrī vasanta gāḍgīlaḥ

गीतम् – ३

लोकहितं मम करणीयम्	**lōkahitaṁ mama karaṇīyam**
मनसा सततं स्मरणीयम् वचसा सततं वदनीयम् लोकहितं मम करणीयम् ॥ लोकहितम् ॥	manasā satataṁ smaraṇīyaṁ vacasā satataṁ vadanīyaṁ lōkahitaṁ mama karaṇīyam || lōkahitam ||
न भोगभवने रमणीयम् न च सुखशयने शयनीयम् । अहर्निशं जागरणीयम् लोकहितं मम करणीयम् ॥ लोकहितम् ॥	na bhōgabhavanē ramaṇīyaṁ na ca sukhaśayanē śayanīyam | aharniśaṁ jāgaraṇīyaṁ lōkahitaṁ mama karaṇīyam || lōkahitam ||
न जातु दुःखं गणनीयम् न च निजसौख्यं मननीयम् । कार्यक्षेत्रे त्वरणीयम् लोकहितं मम करणीयम् ॥ लोकहितम् ॥	na jātu duḥkhaṁ gananīyaṁ na ca nijasaukhyaṁ mananīyam | kāryakṣētrē tvaraṇīyaṁ lōkahitaṁ mama karaṇīyam || lōkahitam ||
दुःखसागरे तरणीयम् कष्टपर्वते चरणीयम् । विपत्तिविपिने भ्रमणीयम् लोकहितं मम करणीयम् ॥ लोकहितम् ॥	duḥkhasāgarē taraṇīyaṁ kaṣṭaparvatē caraṇīyam | vipattivipinē bhramaṇīyaṁ lōkahitaṁ mama karaṇīyam || lōkahitam ||
गहनारण्ये घनान्धकारे बन्धुजना ये स्थिता गह्वरे । तत्र मया सञ्चरणीयम् लोकहितं मम करणीयम् ॥ लोकहितम् ॥	gahanāraṇyē ghanāndhakārē bandhujanā yē sthitā gahvarē | tatra mayā sañcaraṇīyaṁ lōkahitaṁ mama karaṇīyam || lōkahitam ||
- डा. श्रीधर भास्कर वर्णेकर	- ḍā. śrīdhara bhāskara varṇēkara

गीतम् – ४

मृदपि च चन्दनम्

मृदपि च चन्दनमस्मिन् देशे ग्रामो ग्रामः सिद्धवनम् ।
यत्र च बाला देवीस्वरूपा बालाः सर्वे श्रीरामाः ॥

हरिमन्दिरमिदमखिलशरीरं धनशक्ती जनसेवायै
यत्र च क्रीडायै वनराजः धेनुर्माता परमशिवा॥
नित्यं प्रातः शिवगुणगानं
दीपनुतिः खलु शत्रुपरा ॥ ॥मृदपि॥

भाग्यविधायि निजार्जितकर्म यत्र श्रमः श्रियमर्जयति।
त्यागधनानां तपोनिधीनां गाथां गायति कविवाणी
गङ्गाजलमिव नित्यनिर्मलं
ज्ञानं शंसति यतिवाणी ॥ ॥मृदपि॥

यत्र हि नैव स्वदेहविमोहः युद्धरतानां वीराणाम् ।
यत्र हि कृषकः कार्यरतः सन् पश्यति जीवनसाफल्यम्
जीवनलक्ष्यं न हि धनपदवी
यत्र च परशिवपदसेवा ॥ ॥मृदपि॥

-श्री जनार्दन हेगडे

एकात्मता मन्त्रः ।	**ēkātmatāmantra:**
यं वैदिका मन्त्रदृशः पुराणाः इन्द्रं यमं मातरिश्वानमाहुः। वेदान्तिनोऽनिर्वचनीयमेकं यं ब्रह्मशब्देन विनिर्दिशन्ति॥	yaṁ vaidikā mantradṛśaḥ purāṇāḥ indraṁ yamaṁ mātariśvānamāhuḥ | vedāntino nirvacanīyamekam yaṁ brahma śabdena vinirdiśanti ||
शैवा यमीशं शिव इत्यवोचन् यं वैष्णवा विष्णुरिति स्तुवन्ति। बुद्धस्तथाऽर्हन्निति बौद्धजैनाः सत् श्री - अकालेति च सिक्खसन्त: ॥	śaivāyamīśaṁ śiva ityavocan yaṁ vaiṣṇavā viṣṇuriti stuvanti | buddhastathārhan iti bauddha jaināḥ sat śrī akāleti ca sikhkha santaḥ ||
शास्तेति केचित् प्रकृतिः कुमारः स्वामीति मातेति पितेति भक्त्या। यं प्रार्थयन्ते जगदीशितारं स एक एव प्रभुरद्वितीयः॥	śāsteti kecit prakṛti kumāraḥ svāmīti māteti piteti bhaktyā | yaṁ prārthanyante jagadīśitāram sa eka eva prabhuradvitīyaḥ ||

Meaning:

Whom (Yam) the Vaidika Mantradrashah (those who have understood the Vedas and to whom the mantras were revealed), the Puranas (stories and history of ancient times) and other sacred scriptures call: Indram (Indra, the God of Gods), Yamam (Yama, the eternal timeless God) and Mātariśvā (present everywhere like air). Whom the Vedāntins (those who follow the philosophy of Vedānta), indicate by the word Brahma as the One (ekam) which cannot be described or explained (Nirvachaniya).

Whom the Śaivas call (Avochan) the Omnipotent (Yamisham) Śiva and Vaishnavas praise (stuvanti) as Vishnu, the Buddhists and Jains (Baudhajainaha) respectively call as Buddha and Arhant (without any end), whom the Sikh sages (Sikh-santaha) call Sat Śrī Akāl (the timeless Truth).

Some (kecit) call Whom as Śāstā, some as prakṛti:, and some as Kumāra, some call It Swāmī (Lord of the Universe and protector of all), some Mātā (divine mother) or Pitā (father). To whom they offer prayers, It (Sa) is the same and the only One (Eka Eva), without a second (advitiyah).

शान्तिमन्त्रः-	**Peace Invocation**
ॐ सर्वे भवन्तु सुखिनः	sarve bhavantu sukhinaḥ
सर्वे सन्तु निरामयाः ।	sarve santu nirāmayāḥ |
सर्वे भद्राणि पश्यन्तु	sarve bhadrāṇi paśyantu
मा कश्चिद् दुःखभाग् भवेत् ॥	mā kaścid duḥkhabhāg bhavet ||
ॐ शान्तिः शान्तिः शान्तिः ॥	auṁ śāntiḥ śāntiḥ śāntiḥ ||